# Kurukshetra Mahatmyam

# कुरुक्षेत्रमहात्म्यम्

## Document Information

Text title : Kurukshetra Mahatmyam

File name : kurukShetramahAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 32|| -

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 18, 2023

*sanskritdocuments.org*

# कुरुक्षेत्रमहात्म्यम्

(शिवगौरीसंवादे)
देवी -
कुरुक्षेत्रं गता गङ्गा उत्कृष्टेति त्वयोदितम् ।
कुरुक्षेत्रस्य माहात्म्यं वद सर्वसुरोत्तम ॥ १॥

—

सूतः -
इत्थं देव्या महादेवः पृष्टो वचनमब्रवीत् ।
श्रृणु देवि कुरुक्षेत्रमहिमां मत्कृपाबलात् ॥ २॥

कुरुसंवरणो नाम राजाऽभूत् सोमवंशजः ।
स राज्यं प्राप्य मेधावी वनेऽस्मिन् पावने मम ॥ ३॥

नानाद्रुमशतोपेतं फलपुष्पविराजितम् ।
आश्रमं तं द्विजैर्युक्तं प्रशान्तं हरिमेधसः ॥ ४॥

प्रशान्तवैरैर्मुनिभिर्मृगैरन्योन्यवत्सलैः ।
तद्वनं स नृपो गत्वा ददर्श हरिमेधसः ॥ ५॥

दृष्ट्वा मुनिवरं राजा प्रणतः पादयोस्तदा ।
निषसाद तदुद्दिष्टे विष्टरे नृपसत्तमः ॥ ६॥

तं पूजयित्वा राजानं हरिमेधा मुनिस्तदा ।
प्राह तं विनयोपेतं राजानं प्राञ्जलिं स्थितम् ॥ ७॥

सोमान्वयसुधासिन्धोश्चन्द्रस्त्वमसि पार्थिव ।
एकाकी विपिने घोरे कथं मां समुपागतः ॥ ८॥

स्वसैन्यवर्जितो राजा गजवाजिसमाकुलः ।
तदा मुनिं स विनयात्प्राह राजा कृताञ्जलिः ॥ ९॥

राजा -
मृगयाव्यपदेशेन भवन्तं द्रष्टुमागतः ।
दृष्ट्वा तां मुनिशार्दूल धन्योऽस्म्यद्य कृपां कुरु ॥ १०॥

निवासो मम धन्यो हि देशः कश्चिद्विधीयताम् ।
पशव्यश्च सदोषध्यः प्रभूतसलिलो महान् ॥ ११॥

मान्यस्त्वं मुनिशार्दूल ध्यात्वा दिव्येन चक्षुषा ।
इत्थं संवरणप्रोक्तं वचः श्रुत्वा तदा ऋषिः ॥ १२॥

राजानं स तदा प्राह विनयानतकन्धरम् ।
मुनिः -
श्रृणु वृत्तं पुराश्चर्यं राजन्मत्तः प्रवर्तितम् ।
तप्तवानस्मि सुमहत्तपो दीर्घं पुरा नृप ॥ १३॥

एतस्मिन्नेव विपिने सदा मुनिजनावृते ।
भस्मोद्धूलितसर्वाङ्गो रुद्रसूक्तजपादरः ॥ १४॥

रुद्राक्षमालाभरणो रुद्रलिङ्गार्चकः सदा ।
पञ्चाक्षरपरो नित्यं निवसामि ऋतून्बहून् ॥ १५॥

पञ्चाग्निमध्यनिरतः पञ्चास्यध्यानतत्परः ।
तपोयुक्तं सदा मां हि वेदवेद्यो महेश्वरः ॥ १६॥

प्रादुरासीद्वृषारूढः साम्बिकश्च त्रिलोचनः ।
गणवृन्दैः परिवृतो नानालङ्कारभूषितः ॥ १७॥

प्रणम्य तत्पदद्वन्द्वं भक्त्या तमहमस्तुवम् ॥

—

हरिमेधाः -
शम्भो मत्तेभकुम्भस्थगित महावृत्तरम्भाभाण
दग्धापस्मार शिक्षाक्षपितकलुषपादाक्षपादादिवन्द्य ।
द्वन्द्वातीताव्ययेश श्रुतिशिखरगताकाशकोशाश्रयेश
धीरा धृत्या । । । कराग्रतोलनमिषादान्दोलितस्ते गिरिः ॥ १८॥

भीतां बाहुतलेन कण्ठमिलनाज्जातक्रुधं त्वां शिवं ।
त्वत्पादाग्रनिघर्षनिम्नगिरिराण्मूलस्थितैः स्वैः करैः ।
देवं स्तौति तदार्तनादविवशो वेदैस्तदा रावणः ॥ १९॥

संराजं त्वामध्वराणां महेशं होतारं त्वा सत्यजयं रोदस्योः ।
विभ्राजं त्वां देवमीशानतोऽस्मि ताम्रं शम्भुं विश्वमीशानमाद्यम् ॥ २०॥

—

इति मत्स्तोत्रजातेन तुष्टः कष्टहरः शिवः ।
प्राह मां प्रणतो देवो नीलकण्ठो महेश्वरः ॥ २१॥

ईश्वरः -
श्रृणु विप्रानया स्तुत्या भक्त्या तुष्टोऽस्मि साम्प्रतं ।
लिङ्गेऽस्मिन् संवसाम्यद्य त्वया बिल्वादिपूजिते ॥ २२॥

कुरुजाङ्गलमेतच्च पुण्यं क्षेत्रं भविष्यति ।
कुरुक्षेत्रेश्वरश्चाहं लिङ्गे नित्यं वसाम्यहम् ॥ २३॥

गङ्गापि परितो देव क्षेत्रं सम्प्लावयिष्यति ।
कुरुक्षेत्रकृतं पुण्यं महच्चैव भविष्यति ॥ २४॥

सोमवंशे कुरुर्नाम भविष्यति नृपात्मजः ।
स यदा त्वां समागत्य परिपृच्छत्यनामयम् ॥ २५॥

तस्मै मदुक्तिसर्वस्वं ब्रूहि त्वं वदतां वर ।
स चात्र नगरं श्रेष्ठं राजा विस्तारयिष्यति ॥ २६॥

प्राकारपरिखोपेतं नानासौधविराजितम् ।
शस्त्रास्त्रयन्त्रशोभाढ्यं चातुर्वर्ण्यजनाश्रयम् ॥ २७॥

विपणापणसन्धानचत्वरं वनशोभितम् ।
मम लिङ्गालयं पुण्यं सप्रकारं सगोपुरम् ॥ २८॥

नानामण्टपशोभाढ्यं कुरुक्षेत्रेश्वरस्य मे ।
नानावाहनशोभाढ्यं महारथवैर्रयुतम् ॥ २९॥

कारयिष्यति भूपालस्तत्र कालः प्रतीक्ष्यताम् ।
मुनिः -
कालप्रतीक्षा हि मया शिवाज्ञापरिपालकः ।
निवसामि महाबाहो क्षेत्रेऽस्मिन्कुरुजाङ्गले ॥ ३०॥

लिङ्गमेतन्महेशस्य भूरिबिल्वैः समर्चयन् ।

मुनिभिः शाम्भवैरेभिर्भवन्मार्गप्रतीक्षकः ॥ ३१॥

लिङ्गं मङ्गलदं प्रपश्य वसुधाधीशाद्य कष्टापहं
दृष्टं जन्मजरादिरोगजनितामृत्यादि (?) दुःखोत्करम् ।
हन्त्येवापदमुत्तमं शिवजनैः सम्पूजितं कष्टहृत्
तुष्टस्त्वय्यखिलाघहारकहरोत्कृष्टां विमुक्तिं त्वयि ॥ ३२॥

दास्यत्येव सदा हि भाग्यमतुलं जुष्टं स वै शङ्करः ।
इतः परं भवान् राजा कार्यस्यास्य परायणम् ॥ ३३॥

इत्थं मुनिवचोवीचीजातानन्दकुतूहलः ।
कुरुस्तमाह विनयाद्धरिमेधं द्विजोत्तमम् ॥ ३४॥

राजा -
कथं जाङ्गलमेतद्धि मम वासाय कल्पते ।
नानामृगगणाकीर्णं नानाशार्दूलसेवितम् ॥ ३५॥

सुरम्यं चत्वरोपेतं नगरं मुनिसत्तम ।
कथमेतद्भवेद्भद्रमुपायश्चात्र कथ्यताम् ॥ ३६॥

स मुनिस्तं कुरुं प्राह देववाक्यं मुनिस्तदा ।
मुनिः -
तपसा साधयेत् सर्वं शिवाद्देवोत्तमोत्तमात् ।
इत्युक्त्वा तं नृपं विप्रो दीक्षयित्वा विधानतः ॥ ३७॥

प्राह पञ्चाक्षरं मन्त्रं राजानं भस्मभूषणम् ।
जजाप शतरुद्रीयं कुरुक्षेत्रेशमर्चयन् ॥ ३८॥

बिल्वपत्रैस्तथा पुण्यैर्धूपैर्दीपैर्मनोहरैः ।
नैवेद्यैः पायसापूपैः सदन्नैः कल्पयन्नृपः ॥ ३९॥

तन्नैवेद्यैः शाम्भवानां भोजनानि तदा व्यधात् ।
प्रदक्षिणनमस्कारैः स्तोत्रैश्च विविधैरपि ॥ ४०॥

प्रणम्य देवं तुष्टाव स नृपो मुनिना सह ।
स्तुतिनुतविबुधाद्यपादपादं दमितानेकसुरद्रुहोरुपादम् ।
यमिमानसपद्मलीलपादं भज कालानलभीतिदोग्रपादम् ॥ ४१॥

विषमाक्षमलुक्ष(?)बद्धिवीक्षं विधिविष्ण्वाद्यमरादिवृन्दवीक्षम् ।

रणदक्षं जगतोऽखिलैकभक्षं भज दक्षाध्वरनाशने सुदक्षम् ॥ ४२॥

वीक्षाशिक्षितमन्मथं सुरगणाध्यक्षं महोक्षाङ्गगम् ।
कुक्षिस्थाखिललोकजालमुमया ध्यायेन्मृगाक्षिक्षयम् ॥ ४३॥

सूतः -
इत्थं स राजा विविधस्तुतिभिः सपर्यया पूज्य महेशलिङ्गम् ।
स्तुवन्मुनीनां पुरतो ददर्श गौर्या वृषस्कन्धगतं तदा माम् ॥ ४४॥

॥ इति शिवरहस्यान्तर्गते शिवगौरीसंवादे कुरुक्षेत्रमहात्म्यम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः ३२॥ -

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 32.. -

Notes:

Shiva appears to Muni Harimedhas who is worshipping in the dense forest near the southern course of Ganga, and tells him that King Kurusamvarana will come through whom a temple will be built at that place that would come to be known ad Kurukshetra. Shiva mentions that He will reside in Kurukshetra Shiva Kshetra as Kurukshetreshwara, and explains the merit of His worship in the kshetra. King Kurusamvarana arrives in the Kuru Forest and meets Muni Harimedhas, and worships the Shiva Linga as directed by him.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Kurukshetra Mahatmyam*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*